( प्रधानव्यभिचारिप्रभृतयो भावशब्देनोच्यन्ते। यदुक्तं साहित्यदर्पणे तृतीयपरिच्छेदे।
"सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते॥")
भावग्राहे यथा,—
"शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक्।
रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते॥"
इति भक्तिरसामृतसिन्धुः॥ ...॥

भावकः, पुं, ( भाव एव स्वार्थे कन्।) भावः। भावको विकारः। इति हलायुधः॥ (भवतीति। भू+कर्त्तरि ण्वुल्।) सत्ताश्रये, त्रि। इति संक्षिप्तसारः॥

भावत:, त्रि, ( भवत अयमिति। भवत्+अण्।) भवदीयः। ग्रहन्तभवच्छब्दादण्प्रत्ययनिष्पन्नः। इति सिद्धान्तकौमुदी॥

भावत्कः, त्रि, (भवतामयमिति। भवत्+"भवतष्ठक्छसौ।" ४।२।११५। इति ठक्।) भवदीयः। भवच्छब्दात् ठक्प्रत्ययनिष्पन्नः। इति सिद्धान्तकौमुदी॥ यथा, भट्टिपञ्चमसर्गे।
"भावत्कं इदवत्स्वेतदस्माकमपि सुजीवितम्॥"

भावनं, क्ली, ( भू+णिच्+ल्युट्।) भवनम्। इति राजनिर्घण्टः॥ चालना इति भाषा॥ ( भावे ल्युट्।) भावना। इति मेदिनी। ने, १०१॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे।
"सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम्॥"
भावयतीति। भू+णिच्+ल्युः। उत्पादके, त्रि। यथा, महाभारते। १। २२४। ४५।
"इष्टेव च स राजानं शङ्करो लोकभावनः।
उवाच परमप्रीतः श्वेतकिं नृपसत्तमम्॥")

भावना, स्त्री, क्ली, (भू+णिच्+युच्।) ध्यानम्। ( यथा, गीतायाम्। २। ६६।
"नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्॥")
पर्य्यालोचनम्। अधिवासनम्। इति मेदिनी। ने, १०१॥ त्रिविधा भावना यथा,—
"त्रिविधा भावना विप्र! विश्वमेतन्निबोध मे।
ब्रह्माख्या कर्म्मसंज्ञा च तथा चैवोभयात्मिका॥
ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिकापरा।
उभयात्मिका तथैवान्या त्रिविधा भावभावना॥
सनन्दनादयो ब्रह्मभावभावनया युताः।
कर्म्मभावनया चान्ये देवाद्याः स्थावराश्चराः॥
हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा।
बोधाधिकारयुक्तेषु विद्यते भावभावना॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः॥
त्रिविधभावनाश्रयजीवात्मकत्वात्तदुपचारेण त्रिविधा भावनेत्युच्यते। एतद्धि हरेः स्थूलं रूपम्। अतः पररूपप्राप्त्युपायत्वात् तत्र प्रथमं मनः सन्धार्य्यमिति भावः। भावना नाम ज्ञानविशेषणा वासना। तां त्रिविधामपि संज्ञामादिशति ब्रह्माख्येति। तामेव विषयभेदेन विविनक्ति ब्रह्मभावनात्मिकेति। भावभावना भावो वस्तु तद्विषया भावना त्रिविधा।
तत्र वयं ब्रह्मैव भावयामः। वयं कर्म्मैव कुर्म्मः। वयमुभयमिदमनुसन्दध्म इत्येवं त्रिविधा भावना। भावनायुक्तान् जीवानुदाहरति सनन्दनादय इति द्वाभ्याम्। इति तट्टीका॥

भावबोधकः, पुं, ( भावस्य रत्यादेर्बोधकः अनुभावकः।)अनुभावः। इत्यमरः।२।७।२१॥ भावस्य रत्यादेर्बोधकः सूचको गुणक्रियादिरनुभावः। अनुभाव्यते प्रतीतियोग्यतां नीयते रत्यादिरनेनेति अनुभावः घञ्। तत्र रतेरनुभावाः लोचनचातुर्य्यभ्रूक्षेपादयः। हासस्य च कपोलाकुञ्चनानासोत्फुल्लनादयोऽनुभावा एवं अन्यत्रानुमन्तव्यम्। किंवा भावाननुभावयतीति अन्। अनुभावो सुखरागादिः। इति तट्टीकायां भरतः॥

भाववृत्तः, पुं, ( भावः सत्ता वृत्तः प्रवृत्तोऽस्मादिति। यद्वा, भावः सृष्टिः तत्र वृत्तः प्रवृत्तः।) ब्रह्मा। इति सन्ध्याव्याख्यायां स्मृतिः॥

भावाटः, पुं, ( भावं भावेन वाटतीति। अट्+अण् अच् वा।) भावकः। साधुः। निवेशः। कामुकः। नटः। इति मेदिनी। टे, ५२॥

भावानुगा, स्त्री, ( भावं मूर्त्तपदार्थमनुगच्छतीति। अनु+गम्+डः। टाप्।) छाया। इति राजनिर्घण्टः॥ (भक्त्यादिना अनुगते, त्रि॥)

भावालीना, स्त्री, (भावेषु मूर्त्तपदार्थेषु आलीना।) छाया। इति राजनिर्घण्टः॥

भावितः, त्रि, (भाव्यते स्मेति। भू+णिच्+क्तः।) वासितः। प्राप्तः। इति मेदिनी। ते, १४०॥ विशोधितः। ( यथा, महाभारते।१३।१६।३८।
"ये चैनं प्रतिपद्यन्ते भक्तियोगेन भाविताः।
तेषामेवात्मनात्मानं दर्शयत्येष हृच्छयः॥")
चिन्तितः। मिश्रितः। भू क शुद्धिचिन्तयोर्मिश्रणे च इत्यस्मात् भ्वन्तात् क्तप्रत्ययनिष्पन्नोऽयम्॥ ( समर्पितः। यथा, महाभारते। १। ५। ३२।
"एतत् संरक्षितं ब्रह्मंस्तापचर्य्याचिकित्सितम्।
यदीश्वरे भगवति! कर्म्म ब्रह्मणि भावितम्॥"
"भगवति भावितं समर्पितम्।" इति तट्टीकायां श्रीधरस्वामी॥ सिक्तः। यथा, सुश्रुते चिकित्सितस्थाने। १ अध्याये।
"भल्लातकान् वासयेत्तु क्षीरे प्राङ्मूत्रभावितम्॥")

भावित्रं, क्ली, ( भवतीति। भू+"भूवादिगृभ्यो णित्रन्।" उणा० ४। १७०। इति णित्रन्।) त्रैलोक्यम्। स्वर्गमर्त्त्यपातालम्। इत्युणादिकोषः॥

भाविनी, स्त्री, स्त्रीविशेषः। इत्यमरः॥ भावः शृङ्गारचेष्टाविशेषो विद्यतेऽस्याः भाविनी। इति तट्टीकायां भरतः॥ (यथा, हरिवंशे।११७।३६।
"सा हि तस्याभवज्ज्येष्ठा पत्नी कृष्णस्य भाविनी।
पतिव्रता गुणोपेता रूपशीलगुणान्विता॥")
स्त्रीमात्रम्। इति राजनिर्घण्टः॥ ( स्कन्दस्य मातृगणानामन्यतमा। यथा, महाभारते। ६। ४६। ११।
"भृतघण्टा भूतानन्दा भगनन्दा च भाविनी।
वपुष्मती चन्द्रशीता भद्रकाली च भारत!॥")
वर्त्तमानप्रागभावप्रतियोगिनी च॥

भावी, [ न् ] त्रि, (भविष्यतीति। भू+"सुवश्च।" उणा० ४। ८। इति इनिः। स च णिद्भवति।) भविष्यत्कालादिः। वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकः। यथा,—
"वीरप्रतिपदा नाम तव भावी महोत्सवः॥"
इति कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भगवद्वाक्यम्। इति तिथ्यादितत्त्वम्॥

भावुकं, क्ली, ( भवतीति। भू+"लषपतपदस्थाभूवृषेति।"३।२।१५४। इति उकञ्।)मङ्गलम्। ( यथा, प्रद्युम्नविजये १ अङ्के।
"शक्र! सर्व्वत्र कुशलमस्माकम्। अपि भावुकं वः सुराणाम्॥")
तद्वति, त्रि। इत्यमरः। १। ४। २६॥

भावुकः, पुं, ( भू+उकञ्।) नाट्योक्तौ भगिनीपतिः। इति हेमचन्द्रः॥

भावुकः, त्रि, भवनाश्रयः। भवति यः। इति कर्त्तरि भूधातोर्णुकप्रत्ययेन निष्पन्नः॥ रसविशेषभावनाचतुरः। इति श्रीधरस्वामी॥ यथा,—
"निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः॥"
इति श्रीभागवते। १। १। ३॥
लषपतिपदस्थाभूवृषहनकमगमशॄभ्य उकञ् इति भूधातोरभूततद्भावार्थे कर्त्तरि वार्थे उकञ्प्रत्ययेन लप्स्यभावुक इत्यादयश्च निष्पन्नाः॥

भाव्यं, क्ली, अवश्यभवितव्यम्। इति भूधातोरवश्यम्भावार्थे भावे घ्यण्प्रत्ययेन निष्पन्नम्। यथा। विप्रेण शुचिना भाव्यम्। इति मुग्धबोधव्याकरणम्॥ प्रयोगदर्शनात् कर्त्तरि च तत्र त्रि। यथा,—
"कृतस्य करणं नास्ति दैवाधिष्ठितकर्म्मणः।
भावीत्यवश्यं यद्भाव्यं तत्र ब्रह्माप्यबाधकः॥"
इति कालिकापुराणे ३८ अध्यायः॥

भाष, ङ ऋ वाचि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ,भाषते। ऋ, अबीभषत् अबभाषत्। इति तट्टीकायां दुर्गादासः॥

भाषणं, क्ली, ( भाष+भावे ल्युट्।) कथनम्। यथा। "संलापो भाषणं मिथः।" इत्यमरः॥ ( यथा, सर्व्वदर्शनसंग्रहे। आर्हतदर्शने।
"हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।
आलोच्य भाषणेनापि भावयेत् सूनृतं व्रतम्॥")

भाषा, स्त्री, ( भाष्यते व्यक्तवाग्व्यवहारादिना प्रयुज्यते इति। भाष+"गुरोश्च हलः।" ३।३।१०२। इत्यप्रत्ययः। टाप्।) रागिणीविशेषः। इति हलायुधः॥ वाक्यम्। वाग्देवता। तत्पर्य्यायः। ब्राह्मी २ भारती ३ गीः ४ वाक् ५ वाणी ६ सरस्वती ७ व्याहारः ८ उक्तिः ९ लपितम् १० भाषितम् ११ वचनम् १२ वचः